SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-4, (Oct-Dec) 2025

# भारतीयपरम्परायां शैक्षिकसंस्काराणां सांस्कृतिक-नैतिकमूल्यानि

**Sourav Mandal**
Ph.D. Research Scholar, Dept. of Sanskrit
Gauhati University, Guwahati, Assam, India
Email: souravman732216@gmail.com

**Abstract:** भारतीयपरम्परायां भारतीयसंस्कृतेः शिक्षा न केवलं ज्ञानस्य वहनं करोति, अपितु जीवनमूल्यानां स्थापनायामपि विशेषं सहायकत्वं वहति। अस्यां परम्परायां शैक्षिकसंस्काराः तु एतेषां सांस्कृतिक-नैतिकमूल्यानां संवर्धनस्य हेतो मूलाधाररूपेण वर्तमानाः सन्ति। बाल्यकालादारभ्य एते संस्काराः विद्यार्थिनां कृते व्यक्तित्वविकासम्, चारित्रसमृद्धिं च सुदृढं कुर्वन्ति। गुरुशिष्यपरम्परा, शिष्टाचारपालनम्, राष्ट्रभक्तिः, स्वसंस्कृतेः जिज्ञासा, सांस्कृतिकमूल्यानि च शैक्षिकसंस्कारैः सम्यक् अवगम्यन्ते। एवं सत्यनिष्ठा, कर्तव्यपरायणता, अहिंसा, आत्मनिग्रहश्च इत्यादीनि नैतिकमूल्यानि छात्राणां जीवनमूल्यरूपेण स्थाप्यन्ते। गुरुकुलपद्धतेः प्राचीनकालादारभ्य आधुनिकशिक्षायामपि एषां संस्काराणां प्रासङ्गिकता शाश्वतम् विद्यमाना अस्ति। यद्यपि आधुनिकी शिक्षापद्धतिः पाश्चात्यदृष्टेः प्रभावेण किंचित् विचलिता दृश्यते, तथापि मूल्यपरम्परायाः संवर्धनार्थं शैक्षिकसंस्काराणां पुनः स्थापनं अत्यावश्यकमिति मन्यते। एषः शोधप्रबन्धः एतेषां शैक्षिकसंस्काराणां सांस्कृतिक-नैतिकमूल्यानां विश्लेषणम्, ऐतिहासिकविकासं च प्रस्तौति। यः आधुनिकशिक्षायां प्राचीनभारतीयमूल्यानां समन्वयं साधयितुं प्रेरणां यच्छति।

**Keywords:** गुरुकुलपद्धतिः, शैक्षिकसंस्काराः, सांस्कृतिकमूल्यानि, नैतिकमूल्यानि, भारतीयपरम्परा, आधुनिकशिक्षा।

**भूमिका—**

संस्कारशब्दः 'सम्' उपसगपूर्वक 'कृञ्' धातोः 'घञ्' प्रत्ययेन प्रयुज्यते। संस्कृतसाहित्ये संस्कारशब्दस्य प्रयोगः विविधेषु सन्दर्भेषु नानाभिः अर्थभेदैः सह प्राप्यते। सः केवलं धार्मिकेषु क्रियाविधिषु न उपयुज्यते, अपितु शिक्षा ,संस्कृतिः ,सौजन्यशीलता, व्याकरणशुद्धिः ,प्रशिक्षणम् , संस्करणम् ,आभूषणम् ,स्वरूपम् ,प्रभावः ,स्वभावः ,विशिष्टवृत्तीनां बोधकः अपि अस्ति। अतः संस्कृतसाहित्ये संस्कार इत्यस्य शब्दस्य नानाविधाः सूक्ष्मार्थाः समाहिताः सन्ति, यैः सः शब्दः एकः बहुपरिमेयपदार्थबोधकः शब्दः इति निगद्यते।

रघुवंशे शिक्षा-संस्कृति-प्रशिक्षणरूपसंस्कारः इति उपलभ्यते - "निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक्"।[1] एवं महाकविना कालिदासेन कुमारसम्भवकाव्ये सौजन्यशालिता व्याकरणशुद्धता च इत्येतौ संस्काररूपेण प्रकाशितौ - "संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च"। [2]कालिदासः रघुबंशमहाकाव्ये अपि संस्कारस्य स्वरूपं संशोधनं परिष्कारश्च इति रूपेण प्रतिपादयति - "प्रयुक्तसंस्कार इवाधिकं उभौ"।[3] अभिज्ञानशकुन्तले शोभाभूषनरूपसंस्कारः प्राप्यते - "स्वभावसुन्दरं वस्तु न संस्कारमपेक्षत"।[4] हितोपदेशनामकग्रन्थे संस्कार-शब्दः

प्रभावस्वरूपस्वभावक्रियाछायारूपिः प्रतिपाद्यते।[5] तन्त्रवार्तिकग्रन्थकारः आचार्यः कुमारिलभट्टोऽपि अस्मिन्विषये स्वं मतं ददाति - "योग्यतां चादधानाः क्रियाः संस्कारा इत्युच्यन्ते"।[6] श्रीशबरस्वामिना जैमिनिप्रणीतस्य सूत्रस्य व्याख्यानसमये भाष्ये संस्कारशब्दस्य स्पष्टा परिभाषा दीयते -"संस्कारो नाम स भवति यस्मिन् जाते पदार्थो भवति योग्यः कस्यचिदर्थस्य" इति।[7]

**शैक्षिकसंस्काराणाम् अभिप्रायः—**

शैक्षिकसंस्कारेषु विद्यारम्भसंस्कारः, उपनयनसंस्कारः, वेदारम्भसंस्कारः, केशान्तसंस्कारः, समावर्तनसंस्कारश्च एते संस्काराः प्रतिपाद्यन्ते। शैक्षिकसंस्काराः तादृशाः आज्ञाः वहन्ति, ये मानवस्य शास्त्रज्ञानप्राप्तये आचारयुक्तजीवनस्य स्थापने च सहायकाः भवन्ति। एते संस्काराः धार्मिकस्वरूपयुक्ताः भवन्ति, ये मनसः दोषं विनश्यन्ति, आत्मनं च आध्यात्मिकमार्गेण निर्मलं कुर्वन्ति। एते संस्काराः मानवजीवनस्य सर्वेषु परिस्थितिषु नित्यतया पालनीयाः इति प्राचीनभारतीयदृष्टिः आसीत्। तस्मिन् प्राचीनभारतीयसमाजे, सामाजिकव्यवस्था एवं प्रकारेण विकासिता आसीत् यथा सांस्कृतिकम् आध्यात्मिकं च परंपरा संरक्षितुं समर्था आसीत्, तस्य च सम्यक् विकासः सुनिश्चितः कृत्वा भाविनः सन्ततीनां प्रति तस्य सुसंपन्नं हस्तांतरणं साध्यते। तत्र शिक्षायाः प्रणाली केवलं लेखनपठनशक्तेः विकासाय न, अपि तु नैतिकजीवनमूल्यानां आधाराणां रक्षणाय अभिप्रेतं आसीत्।

भारतीयसंस्कृतेः एतत् महत्वम् अस्ति यत् एषा संस्कृतिः धर्म-अर्थ-काम-मोक्षरूपेषु चतुर्षु पुरुषार्थेषु सम्यक् समन्वयं कुर्वती, क्रमशः पुरुषार्थानां साधनं समाप्य मोक्षरूपकं परमलक्ष्यं प्राप्तुं मार्गं दर्शयति। एते त्रयः धर्मः, अर्थः, कामः यथानुक्रमम् अनुसृत्य, मनुष्यः मोक्षं प्राप्नोति इति तस्याः प्रमुखधारणा आसीत्।[8]

वैदिककालीन आर्याः जन्मतः मृत्युपर्यन्तं विविधान् संस्कारान् अनुष्ठितवन्तः। एतेषां संस्काराणां बहवः आध्यात्मिकं सामाजिकं च उद्देशाः आसन्। मनुस्मृतौ मनुः प्रतिपादयति यत् मन्त्रैः सह सम्पन्नैः संस्कारैः कर्मणां विशेषाधिकारः प्राप्तव्य।[9] सः अपि एवमुक्तवान् यत् मानवशरीरं रक्तेन शुक्रेण च संयोगेन रहस्यमयेन प्रकारेण सृष्टिः भवति, यः स्वभावतः अशुद्धं भवति।[10] संस्काराणां पालनं तादृशं मानसिकस्वभावं निर्माति, यः सामान्यतया मोक्षप्राप्तौ सहायको भवति।[11]

**जीवनस्य आश्रमचतुष्टयम्—**

आश्रम-शब्दस्य उत्पत्तिः आ पूर्वकं 'श्रम्' धातोः निष्पन्नः जाता, यस्य अर्थः परिश्रमः तथा तपः करणम् इति। वस्तुतः, आश्रमशब्देन आदौ तं स्थलं निर्देशयति यत्र तपस्याचरणं भवति। प्राचीनभारते समाजे पुरुषस्य सम्पूर्णं जीवनम् आश्रमचतुष्टये विभक्तम् आसीत्, यथा- ब्रह्मचर्य-गार्हस्थ-वानप्रस्थ-सन्न्यासश्च।[12] एवम् आपस्तम्बधर्मसूत्रोऽपि एते चत्वारः आश्रमाः उल्लिखति।[13] आश्रमचतुष्टये ब्रह्मचर्याश्रमः प्रथमोऽश्रम इति विज्ञायते, एतद्विषये महाभारते तु सुस्पष्टतया उद्धृतः अस्ति।[14]

धार्मिकजीवने, मनुष्यस्य जीवनं चतुर्भिः आश्रमैः विभज्यते, याः वास्तवतः मानसिकावस्थाः एव, यथा ब्रह्मचारि (विद्यार्थी), गृहस्थः (गृहधर्मपालकः), वानप्रस्थः (वनवासी तपस्वी), संन्यासी (त्यागी) च। एतेषां चतुर्णाम् आश्रमधर्मस्य विषयं प्रति शास्त्रे एवमुक्तम्- ब्रह्मचर्य समाप्य गृही भवेत्, गृही भूत्वा वानि भवेत्, वानि भुत्वा प्रवर्जेत्।[15] अर्थात् ब्रह्मचर्यस्य परिसमास्त्ये सति गृहस्थः भवितव्यः। गृहस्थस्य पश्चात् वानप्रस्थं आरभ्यते ततः संन्यासं गृह्यते। चतुर्षु आश्रमेषु ब्रह्मचार्यावस्था जाग्रतमनसा सह संयुक्ता, गृहस्थावस्था सतर्कमनसा सह प्रतिपादिता, वानप्रस्थावस्था निष्काममनसा सह संपृक्ता, संन्यासावस्था मौनमनसा सह संयुक्ता।

**शैक्षिकगतिशीलता गुरुकुलप्रणाली च—**

गुरुकुलप्रणाल्या सम्यक् शैक्षिकगतिशीलता संपाद्यते। शैक्षिकगतिशीलतया विना ज्ञानस्य प्रचारः कदापि न संभवति। एषा जिज्ञासूनां कृते बौद्धिकं मानसिकं च विवेकक्षेत्रं विस्तारेण वर्धयति। शैक्षिकगतिशीलता संकीर्णदृष्टिं विनष्ट्वा विश्वव्यापिनं दृष्टिकोणं संवर्धयति। प्राचीनभारते छात्राः प्रसिद्धं पण्डितं निकषा गत्वा अध्ययनम् अकुर्वन्।[16]

प्रसिद्धाः आचार्याः अपि शैक्षिकः आलोचनार्थं भिन्नेषु भिन्नेषु स्थानेषु यात्रां अकुर्वन्। सामान्यतः छात्राः शिक्षायाः समाप्तौ स्वगुरुं निकषा एव स्थास्यन्ति। परन्तु अध्ययनस्य पूर्णतानन्तरं विशेषज्ञतार्थं अन्यं गुरुं प्रति गन्तुं शक्नुवन्ति। गुरवोऽपि छात्राणां कृते शुभकामनां याचन्ते। उपनिषद्कालान्तरे गुरुः एतादृशं याचते - "यथा अधः सरित्स्वरूपं जलं पतति तथा मासाः वर्षं प्रविशन्ति। तथा सर्वे छात्राः माम् निकषा आगच्छन्तु"।[17] अनेन प्राकरेण शिक्षायाः प्रसारः व्यापकः जातः तथा च समाजः समृद्धः जातः।

**छात्रावस्था सांस्कृतिक-नैतिकमूल्यानि च—**

तस्मिन् काले भारतीयसमाजे शिक्षायाः लाभार्थं केचन संस्काराः विधीयन्ते स्म, तेषु उपनयनसंस्कारः प्रमुखः आसीत्, यः आर्यसमाजे प्रवेशार्थं तथा च तस्य पवित्रशास्त्रस्य अध्ययनाधिकाराय एकं साधनम् इव आसीत्। छात्रावस्थायां सर्वे विद्यार्थीनः ब्रह्मचर्यं यथार्थरूपेण पालनीयम् इति अपेक्ष्यते। एतस्मिन् प्रसङ्गे अथर्ववेदोऽपि एतद् स्पष्टतया प्रतिपादयति।[18]

ब्रह्मचर्यस्य पालनार्थं छात्रः गुरुगृहे निवसति स्म। स 'अन्तेवासी' इति नाम्ना प्रख्यातः, यः गुरुं निकषा वसति।[19] बाल्यावस्थायामेव सः निवसनार्थं आचार्यगृहं आगच्छत्। उपनयनसंस्कारानन्तरं तस्य ब्रह्मचर्याश्रमः आरभ्यत। छात्रावस्थायां तस्य नित्यकृत्यानि अनुष्ठातव्यानि आसन्। सः प्रतिदिनं गुरोः गवां परिचर्या कृत्वा आत्मनिर्भरः अभवत्। यदा सः शिक्षालाभार्थं गुरोः समीपं गच्छति तदा समिधां हस्ते धारणपूर्वकं गच्छति। समिधया सह गुरुं निकषा गमनं ब्रह्मचर्यधर्मस्य प्रतीकं मन्यते। एतत् छात्रस्य तं भावं सूचयति यत्, सः गुरुगृहे निवसन् गुरुं सेवितुमिच्छति, च तस्य गृहाग्नेः नित्यनैमित्तिकरक्षनाय साहाय्यं करोति। मनुना उक्तम् - यथा कश्चन पुरुषः कर्षणयन्त्रेण भूमेः खननं कृत्वा कठिनमयम् आवरणम् अतिक्रम्य जलं प्राप्नोति, तथैव छात्रः सेवया गुरोः हृदयं प्रविशति, हृदयं प्रविश्य ज्ञानं लभते।[20]

अतः आचार्यस्य सेवया विना विद्यायाः समृद्धिः न सम्भवति। पुनः छात्रः प्रतिदिनं भिक्षां अयाचत, सा भिक्षा छात्रस्य स्वार्थाय नाभूत्, केवलं गुरुकुलस्य पोषणाय आसीत्। छात्रैः समाहृता भिक्षा गुरवे दातव्या आसीत्। एषा प्रक्रिया छात्रस्य विनयाभावं प्रकटयति, यया सः अहंकारम् परित्यज्य नम्रतां प्राप्नोति। अस्मिन् संदर्भे शतपथब्राह्मणे अपि स्पष्टतया निरूप्यते।[21] अतः स्पष्टं भवति यत् छात्र केवलं धर्मनिष्ठाः सन्यासिनः नास्ति, अपि तु कर्तव्यपरायणः सुशिक्षितः च नागरिकरूपेण निपुणः आसीत्। तस्य नित्यं कर्म वेदाध्ययनरूपः स्वाध्यायः इति, यः अतीव महत्वपूर्णः आसीत्। एषः स्वाध्यायः 'ब्रह्मयज्ञः' इति उच्यते। शतपथब्राह्मणे उक्तम् - "स्वाध्यायो वै ब्रह्मयज्ञः"।[22] एवं मनुना अपि उक्तम् - 'अध्यापनं ब्रह्मयज्ञः'।[23] स्वाध्यायेन छात्रस्य चित्तं विनयते, तस्य एकाग्रता च वर्धते। एतत् ज्ञानं तं आत्मनिर्भरम्, आत्मनियमयुक्तम्, परिपक्वबुद्धिमन्तं च करोति। अनेन सः यशोऽपि प्राप्नोति।[24]

अतः वेदाध्ययनं सर्वोत्तमं पूज्यं च मन्यते। पुनश्च आचार्यः शिष्यान् उपदिशति - "स्वाध्यायान्मा प्रमदः" इति।[25] अर्थात् वेदाध्ययनं सर्वदा कर्तव्यम्। छात्रस्य प्रतिदिनं स्वरतो वेदं पठितव्यम्। छात्रः गुरोः समीपात् यत् ज्ञानं प्राप्तवान् सः तत् ज्ञानं अन्येभ्यः शिक्षयेत् प्रचारयेत्। अनेन प्रकारेण सः वेदज्ञानं

संरक्षति, येन भविष्यत्प्रजन्मस्य कृते हित भवति। नियमितवेदाध्यासनेन सः ऋषीन् प्रति सम्यक् श्रद्धां प्रकटयति। गृहस्थोऽपि वेदाध्ययनेन ऋषीणां ऋणात् विमुक्तिं प्राप्यते।[26]

छात्रः सर्वदा वेदाध्ययनाय तत्परः भवति, कदापि वेदाध्ययने प्रमादं न करोति। तैत्तिरीयोपनिषदि समावर्तनसमये अयम् आदेशः प्रदत्तः अस्ति यत् - "स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्"।[27] अनेन गुरुः शिष्यं वोधयति यत् - विद्या अनवरतं साधनीया, या चित्तस्य शुद्धिं जनयति। तत्रैव गुरुणा शिष्याय उपदेशः दीयते - "मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव"।[28] एतेषु सर्वेषु व्यक्तिषु देववद् भावः अत्यावश्यकः ,तैत्तिरीयोपनिषदि एतत् स्पष्टतया प्रतिपाद्यते। यः छात्रः एतेभ्यः मनुष्येभ्य सम्मानं न ददाति, तदा तस्य कर्माणि सफलानि न भवन्ति। परन्तु यः तेषां सेवा करोति, सः स्वधर्मं साधयति।[29] वैदिकपरम्परानुसारेण गृहस्थस्य अतिथिं देववत् मान्यतां समर्पणीयम्। यदि अतिथि कदापि निराशः भूत्वा गृहं परित्यजति, तदा स गृहस्थस्य सुखस्य नाशं कर्तूं शक्नोति तथा पापं तस्मै ददाति।[30] अतः गृहस्थस्य अतिथेः सम्यक् सत्कारं कर्तव्यम्। परन्तु अतिथिः च तदा उत्तमचारित्रवान् भवेत्। एतत् ऐतरेयारण्यके स्पष्टतया प्रतिपाद्यते - "यो वै भवति यः श्रेष्ठतां श्नुते स एव अतिथिर्भवति"।[31] अस्मिन् सन्दर्भे मनोः दृष्टिः अपि स्मरणीयः अस्ति।[32] आचार्यस्य सेवया शिष्यः ब्रह्मलोकं लब्धुं शक्नोति।[33] गुरुगृहे विद्यां समाप्य आश्रमात् निर्गमनकाले शिष्याय गुरुः उपदिशति - "सत्यं वद, धर्मं चर"।[34]

अर्थात् सत्यस्य वचनं शिक्षायाः नैतिकतां वर्धयति। शतपथब्राह्मणे अयं सिद्धान्तः निगद्यते – "सत्यमेव देवा अनृतम् मनुष्याः"।[35] सायणाचार्येण अस्य व्याख्या एवं निरूप्यते - "सत्यमेव देवाः चिरावस्थानात् नियमेन सत्यवादित्वाद्वा। अनृतं मनुष्याः स्वप्नदृष्टवदल्पकालावस्थानात् प्रायेणार्तावादित्वाद्वा"॥[36] यो पुरुषः देवपूजनसमये नित्यं सत्यवचनं आचरति ,स दैवत्वं लभते। अतः सत्यमेव मानवानां नैतिकजीवने प्रमुखं मानदण्डमिति स्वीक्रियते। एवञ्च, सायणाचार्येण शतपथब्राह्मणव्याख्यायां पुनरपि उच्यते - "तस्मात् दीक्षितेन सत्यं एव वदितव्यम्"।[37] सामाजिके जीवने प्रत्येकसदस्यस्य स्वकर्तव्यपालनं आवश्यकम्, सौहार्दभावः, शान्तिः, सामञ्जस्यं च धारयितव्यम्। ततः गुरुना शिष्याय उपदिश्यते - कुसलन्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्।[38] पुनश्च गुरुः प्रस्थानशीलाय शिष्याय उपदिशति - "देवपितृकार्याभ्यां न प्रमदितव्यम्"।[39] अर्थात् देवपितृकार्येषु प्रमादः न करणीयः। गुरोः अयं उपदेशः पितृयज्ञं देवयज्ञं च अनवरतं सम्पादयितुं संबद्धः अस्ति।

गृहस्थः पितृयज्ञं देवयज्ञं च कृत्वा पितृणां देवानां च ऋणात् मुक्तो भवति। तैत्तिरीयोपनिषदि गुरुः शिष्याय उपदेशं ददाति - "यान्यनवद्यानि कर्माणि तानि सेवितव्यानि, नो इतराणि। यान्यस्माकं सुचरितानि, तानि त्वयोपास्यानि"।[40]

एषः उपदेशः शिष्येभ्यः सम्यक् मार्गानुसरणे जागरूकतां जनयति। अत्र ज्ञातव्यं - केवलं नैतिकतायाः ज्ञानं न पर्याप्तम्, अपि तु तस्याः व्यवहारिकजीवने समर्पणम् आवश्यकं भवति। तथा च आचार्यः अपि मानवः सन् किञ्चन दोषयुक्तः भवति। अतः तेन उपदिश्यते यत् केवलं तस्य उत्तमान् गुणान् एव अनुकरणं कर्तव्यम्। शिष्यः अपि विवेकपूर्वकं आचार्यस्य श्रेष्ठः व्यवहारः विवेच्य, स एव आदर्शरूपेण स्वीकुर्यात्। यदा शिष्यस्य कस्यचित् कर्मवृत्तौ कर्ममार्गे वा संशयः उत्पद्यते, तदा सः निपुणैः, धर्मनिष्ठैः च ब्राह्मणैः सह मन्त्रणा करणीयम्।[41] एवं गुरुः शिष्याणां चरित्रनिर्माणार्थं जीवनमार्गे आचरितव्यानां अनुसरणीयानां वा धर्मनियमानां विषये उपदेशं दत्तवान्। एते उपदेशाः सर्वकालीनतया सर्वदा शिष्याणां हितार्थं उपयोगिनः भवन्ति।

यदा शिष्यः वेदाध्ययनं समाप्य स्वकर्माणि अपि सम्यक् सम्पादयति, तदा सः गृहस्थाश्रमं प्रतिनिवर्तेत। तत्र सः सद्गुणसम्पन्नं कुलस्य निर्माणं कुर्यात्, शास्त्रपठनं च निरन्तरं पालयेत्। इन्द्रियाणां निग्रहः कर्तव्यः, हिंसा च परित्यज्य जीवितुम् वाञ्छनीयम्। एवं धर्मपरायणः भूत्वा स ब्रह्मलोकं गच्छति, पुनरागमनं च न भवति। विद्या, सदाचारः, पुण्यकर्माणि इत्यादीनि सामाजिकमूल्यरूपेण परिदृश्यन्ते, तानि पितृणां देवानां च लोकानां प्राप्तुं प्रमुखतया साधनानि अपि भवन्ति।[42] समावर्तनम् अर्थात् गुरुकुलात् गृहं प्रत्यागमनम्, ततः विवाहितगृहस्थस्य जीवनस्य आरम्भः भवति। समावर्तनसंस्कारः शिक्षायाः अन्तः निर्देशयति च विवाहजीवनस्य प्रारम्भं सूचयति। गुरोः कर्तव्यं न केवलं ज्ञानप्रदाने सिमितम् आसीत्, अपितु सांस्कृतिकं नैतिकं च विकासं छात्रेषु संवर्धनियम् आसीत्। अतः गुरुः शिक्षाकाले शिष्यस्य समग्रं विकासं निर्मातुं प्रयत्नशीलः भवेत्।

**निष्कर्षः—**

भारतीयशैक्षिकपरम्परा विश्वस्य प्राचीनतमा समृद्धशालिनी च परम्परा अस्ति, यया केवलं ज्ञानप्रदानं न धार्यते, अपि तु मनुष्यस्य व्यक्तित्वविकासस्य आचरणस्य, चरित्रस्य च संशोधनार्थं आधारभूतं साधनं अस्ति। अत्र गुरुकुलपद्धतिः, वेदशास्त्राध्ययनम्, योगाभ्यासः, तथा नैतिकशिक्षायाः प्रमुखाङ्गानि आसन्। एषा शिक्षापद्धतिः विद्यार्थिनां जीवनानां नैतिकविकासाय समुन्नतं कर्तुं निश्चयशीला आसीत्। सांस्कृतिकदृष्ट्या अपि, शिक्षापरम्परायाः रक्षणम्, सामाजिकैक्यम्, कर्तव्यानुष्ठानं च निश्चितम् अभवत्। भारतीयसंस्कृतेः विशेषता अस्ति 'वसुधैव कुटुम्बकम्' 'सर्वे भवन्तु सुखिनः' इत्यादि दृष्टेः आकर्षणं भवति। एषः दार्शनिकदृष्टिकोणः शिक्षायै समाजे प्रस्थापितः। राष्ट्रनिर्माणे सांस्कृतिक-नैतिकमूल्यानां संरक्षणं अत्यन्तं महत्त्वं प्रवहति। अतः, पूर्णतया वयं एतत् अवगन्तुं शक्नुमः यत् भारतीयशैक्षिकपरम्परा केवलं विद्यायाः प्रदानस्य माध्यमं न, अपि तु सांस्कृतिक-नैतिकमूल्यानां संप्रेषिका एव, तथा च मानवस्य चरित्रनिर्माणस्य आधारभूता आसीत्।

अधुनिकसन्दर्भे, यत्र शिक्षा केवलं व्यवसायिकसाधनरूपेण तथा जीविकायाः उपकरणरूपेण परिगण्यते, तत्र भारतीयपरम्परायाः सदाचारसम्पन्नदृष्टिः पुनः स्थापयितव्या। एषा दृष्टिः बालानां चरित्रविकासाय, अपि तु राष्ट्रस्य नैतिकाधारस्य सुदृढीकरणे अतीव महत्वपूर्णा भूमिका निर्वहति। अतः वयं एतान् शिक्षासंस्कारान्, सांस्कृतिक-नैतिकमूल्यानि च आवश्यकं रक्षेम।

## Endnotes

1. रघुवंशम्, ३/३५
2. कुमारसम्भवम्, १/२८
3. रघुवंशम्, ३/१८
4. शाकुन्तलम्, ७/३३
5. हितोपदेशः, १/८
6. वाचस्पत्य-वृहदभिधान, v. पृ. ५१८८
7. जैमिनीयसूत्र शवरभाष्य, ३.१.१
8. विदे, शर्मा, जोगेश्वरः, उपनिषद्सु शिक्षादर्शनम्, पृ. २३८
9. निषेकादि श्मशानान्तो मन्त्रैर्यस्योदितो विधिः। तस्य शास्त्रेऽधिकारोऽस्मिन ज्ञेयो नान्यस्य कस्यचित्॥ मनुस्मृति, २.१६
10. वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्। कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च॥ तत्रैव, २.२६

11. स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः। महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः॥ तत्रैव, २.२८ ब्राह्मी ब्रह्मप्राप्तियोग्येयं तनुः तन्नवच्छिन्न आत्मा क्रियते। कर्मसहकृतब्रह्मज्ञानेन मोक्षावाप्तेः।। कुल्लुकः, तत्रैव
12. पूर्वमेव भगवता ब्रह्मणा लोकहितमनुतिष्ठता धर्मसंरक्षणार्थमाश्रमाश्चत्वारोऽभिनिर्दिष्टाः। महाभारतम्, १२.१९१.८
13. चत्वार आश्रमाः गृहस्थ्यम् आचार्यकुलं मौनं वानप्रस्थ्यमिति। आपस्तम्बधर्मसूत्रम्, २.२१.१
14. तत्र गुरुकुलवासमेव प्रथममाश्रममुदाहरन्ति। महाभारतम्, १२.१९१.८
15. *Jābālopaniṣad*, Quoted by Sarmah, Jogeswar, *Philosophy of Education in the Upaniṣads*, p.72
16. वृहदारण्यकोपनिषद्, ३.१.१, ३.७.१
17. यथापः प्रवता यन्ति यथा मासा अहर्जरम्। एवं मां ब्रह्मचारिणो धार्तरायन्तु सर्वतः स्वाहा॥ तैत्तिरीयोपोनीषद्, १.४.३
18. ब्रह्मचर्येण तपसा देवा मृत्युमुपाघ्नत। अथर्ववेद, ११.१५.१९
19. छान्दग्यपोनिषाद, ४.१०.१
20. यथा खनन् खानित्रेण नरो वार्यधिगच्छति। तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति॥ मनुस्मृति, २.२१८
21. अथ यदात्मानां दरिद्रीकृत्येवाहीर्भूत्वा भिक्षते। शतपथब्राह्मण, ११.३.३.५
22. तत्रैव, ११.५.६.३
23. मनुस्मृति, ३.७०
24. शतपथब्राह्मण, ११.५.७.१
25. तैत्तिरीयोपनिषद, १.११.१
26. स्वाध्यायप्रवचनाभ्यां न प्रमादितव्यम्। तत्रैव, १.११.१
27. तैत्तिरीयोपनिषद, १.११.१
28. तत्रैव, १.११.२
29. सर्वे तस्यादृता धर्मा यस्येते तत्र आदृताः। अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः॥ मानुस्मृति, २.२३४
30. अतिथिर्यस्य भग्नाशो गृहत् प्रतिनिवर्तते। स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति॥ महाभारत, १२,१९१.१२
31. ऐतरेयारण्यक, १.१.१
32. आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः। माता पृथिव्याः मूर्तिः तु भ्राता स्वो मूर्तिरात्मनः।। मनुस्मृति, २.२२६
33. इमं लोकं मातृभक्त्या, पितृभक्त्या तु मध्यमम्। गुरुशुश्रूषया त्वेवं ब्रह्मलोकं समश्नुते॥ तत्रैव, २.२२३
34. तैत्तिरियोपनिषद, १.११.१
35. शतपथब्राह्मण, १.१.१.४
36. तत्रैव, सायणाचार्यः
37. तत्रैव, सायणाचार्यः
38. तैत्तिरियोपनिषद, १.११.१
39. तत्रैव, १.११.२
40. तत्रैव
41. अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्। ये तत्र ब्राह्मणाः सम्मर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तत्र वर्तेरन्। तथा तत्र वर्तेथाः॥ तत्रैव, १.११.३.४

42. ..... धर्मिकान्विदधदात्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्य अहिंसन् सर्वभूतानि, अन्यत्र तीर्थेभ्यः स खलु एवम् वर्तयन् यावदायुषम् ब्रह्मलोकम् अभिसंपद्यते न च पुनर्वर्तते, न च पुनरावर्तते॥ छान्दोग्योपोनिषद्, ८.१५.१

## Bibliography


- *अथर्ववेदसंहिता.* विलियम् ड्वाइट् व्हिट्नी. दिल्ली : मोतीलाल बनारसिदास, १९६२.Top of FormBottom of FormBottom of Form
- अधिकारी, तारकनाथः. *गोपथब्राह्मणम्* समालोचनात्मक-अध्ययनम्. कलकत्ता : संस्कृत पुस्तक भाण्डारः, १९९४.
- *अभिज्ञानशकुन्तलम्,* सम्पा. सत्यनारायण चक्रवर्ती, संस्कृत पुस्तक भाण्डार, कोलकाता, २०१०
- *आश्वलायनगृह्यसूत्रम्.* सम्पा. जमुना पाठकः. द्वितीयमुद्रणम्. वाराणसी : चौखम्बा संस्कृत-सिरिज् अफिस, २०१८.
- एग्लिङ्, जे. अनु. *शतपथब्राह्मणम्.* सैंट्रल् इंडिया इन्स्टिट्यूट्, खण्डाः XII, XXVI, XLIV। दिल्ली : मोतीलालबनारसीदासः, २००२.
- एस्. सी. बॅनर्जी. *प्राचीनभारतीयसमाजः.* नवदिल्ली. डी. के. प्रिण्ट्वर्ल्ड् (प्रा.) लिमिटेड् प्रकाशन, १९७७.
- कृष्णलालः. *गृह्यमन्त्राः तेषां च विनियोगः.* दिल्ली : नॅशनल् पब्लिशिंग् हाउस्, १९७०.
- *छान्दोग्योपनिषद्* शाङ्करभाष्यसहित. गोरखपुरम् : गीता प्रेस्, २०००.
- *तैत्तिरीयोपनिषद्* शाङ्करभाष्यसहित. दिल्ली : मोतीलालबनारसीदास, १९९२.
- पाण्डेयः, राजबली. *हिन्दूसंस्काराः.* दिल्ली : मोतीलाल बनारसिदास् पब्लिशर्स प्रा. लि., २०१८.
- प्रकाश, ओम्. *प्राचीनभारते धर्मः समाजश्च.* दिल्ली : भारतीयविद्याप्रकाशन, १९८५.
- *मनुस्मृतिः.* सम्पा. कमलनयनः शर्मा. जयपुरम् : जगदीश संस्कृत पुस्तकालय, २०१६.
- *महाभारतम्.* सम्पा. विष्णुशास्त्री सूक्तांकरः. खण्डाः १-४. पूणे : भण्डारकरप्राच्यविद्यापीठ, १९७१.
- मूकर्जी, राधा कुमुदः. *प्राचीनभारतीयशिक्षा.* दिल्ली : मोतीलालबनारसीदासः, १९६०.
- मॅक्स् म्यूलरः एफ्. *प्राचीनसंस्कृतसाहित्यस्य इतिहासः.* वाराणसी : चौखम्बा संस्कृत सिरिज, १९६८.
- रघुवंशः. सम्पा. एम्. आर्. काले. मोतीलाल बनारसीदासः. १९९१.
- साठे, जयश्री. *सामवेदिनाम् गृह्यकर्माणि.* दिल्ली : प्रतिभाप्रकाशनम्, २००४.